# तृतीयः पाठः

अस्माकं चिन्तने राष्ट्रस्य अवधारणा अतिप्राचीना विद्यते। वेदेष्वपि '**आ राष्ट्रे राजन्यः**' (यजुर्वेदः), '**वयं राष्ट्रे जागृयाम**' (यजुर्वेदः), '**अहं राष्ट्री संगमनी वसूनाम्**' (ऋग्वेदः) इत्यादिषु बहुषु मन्त्रेषु राष्ट्र-शब्दस्य प्रयोगेन एतत्स्पष्टमस्ति। अस्मदीया राष्ट्रसम्बन्धिनी अवधारणा अर्वाचीना, पश्चिमाच्चागता इति ये मन्यन्ते ते तु वस्तुतः भ्रान्तास्सन्ति।

अस्माकमिदं भारतवर्षमेकं चिरपुरातनं सनातनं च राष्ट्रं वर्तते। किन्त्वत्र ऋषिभिः मुनिभिः कविभिः तत्त्वचिन्तकैश्च केवलं भौतिकं भौगोलिकं राजनैतिकं च घटकमेव राष्ट्रमिति नैव मतम्। राष्ट्रमिति यदुच्यते तदत्रैकं चेतनं सांस्कृतिकं घटकं मतम्। वयमिदं राष्ट्रदेवं मन्यामहे। एतद् वै भारतमस्माकं दृष्टौ न कश्चिद् मृत्पिण्डो वा भूखण्डो वा विद्यते अपितु मातृभूमिरस्ति; यथा किलोक्तमथर्ववेदे– '**माता भूमिः पुत्रोऽहं पृथिव्याः।**' ऋग्वेदेऽपि कथितमस्ति– '**पृथिवी माता द्यौर्मेपिता।**'

मातृभूमिः, पितृभूमिः, पुण्यभूमिः, धर्मभूमिः, कर्मभूमिः, देवभूमिश्च — इत्येवं विविधैः रूपैरुपेतास्ति भुवनमनमोहिनी इयमस्माकं भारतमाता। राष्ट्रसम्बन्धिनः राष्ट्रियतासम्बन्धिनः, राष्ट्रगौरवसम्बन्धिनः, राष्ट्रभक्तिसम्बन्धिनश्च केचन श्लोकाः अस्मिन् पाठे संकलिताः सन्ति।

## स्वराष्ट्र-गौरवम्

**उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम्।**
**वर्षं तद्भारतं नाम भारती यत्र सन्ततिः ।। १ ।।**

–विष्णुपुराणम्

**हिमालयात् समारभ्य यावदिन्दुसरोवरम्।**
**तं देवनिर्मितं देशं हिन्दुस्थानं प्रचक्षते ।। २ ।।**

–बृहस्पत्यागमः

**गायन्ति देवाः किल गीतकानि**
**धन्यास्तु ते भारतभूमिभागे।**
**स्वर्गापवर्गास्पदमार्गभूते**
**भवन्ति भूयः पुरुषाः सुरत्वात् ।। ३ ।।**

–विष्णुपुराणम्

सम्प्राप्य भारते जन्म सत्कर्मसु पराङ्मुखः।
पीयूष-कलशं हित्वा विषभाण्डमुपाश्रितः ।।४ ।।

–वृहन्नारदीयपुराणम्

एतद्देश - प्रसूतस्य सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ।।५ ।।

–मनुस्मृतिः

अपि स्वर्णमयी लङ्का न मे लक्ष्मण रोचते।
जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ।।६ ।।

–अज्ञातम्

राष्ट्रदृष्टिं नमस्यामो राष्ट्रमङ्गलकारिणीम्।
यया विना न पश्यन्ति राष्ट्रं स्वनिकटस्थितम् ।।७ ।।

–अमृतवाग्भवाचार्यः

समानसंस्कृतिमतां यावती पितृ - पुण्यभूः।
तावतीं भुवमावृत्य राष्ट्रमेकं निगद्यते ।।८ ।।

–तदेव

पितृभूत्वं पुण्यभूत्वं द्वयं यस्य न विद्यते।
तस्य स्वत्वं तत्र राष्ट्रे भवितुं न किलार्हति ।।९ ।।

–तदेव

राष्ट्रस्योत्थानपतने राष्ट्रियानवलम्ब्य हि।
भवतस्सर्वदा तस्माच्छिक्षणीयास्तु राष्ट्रियाः ।।१० ।।

–तदेव

विद्या शस्त्रं च शास्त्रं च द्वे विद्ये प्रतिपत्तये।
शस्त्रेण रक्षिते राष्ट्रे शास्त्रचर्चा प्रवर्तते ।।११ ।।

–चाणक्यः

## अन्वयः

१. यत् समुद्रस्य उत्तरं हिमाद्रेः च एव दक्षिणं, यत्र भारती (नाम) सन्ततिः, तत् भारतं वर्षं नाम।

२. हिमालयात् समारभ्य इन्दुसरोवरं यावत् (यः देशः स्थितः), देवनिर्मितं तं देशं हिन्दुस्थानं प्रचक्षते।

३. देवाः किल गीतकानि गायन्ति (यत्), धन्याः तु ते पुरुषाः सन्ति (ये) स्वर्गापवर्गास्पदमार्गभूते भारतभूमिभागे सुरत्वात् भूयः भवन्ति।

४. भारते जन्म सम्प्राप्य (अपि यो जनः) सत्कर्मसु पराङ्मुखः (भवति, सः) पीयूष-कलशं हित्वा विषभाण्डम् उपाश्रितः।

५. एतद्देशप्रसूतस्य अग्रजन्मनः सकाशात् पृथिव्यां सर्वमानवाः स्वं स्वं चरित्रं शिक्षेरन्।
६. (हे) लक्ष्मण! स्वर्णमयी अपि लङ्का मे न रोचते। जननी जन्मभूमिश्च स्वर्गादपि गरीयसी (भवति)।
७. राष्ट्रमङ्गलकारिणीं राष्ट्रदृष्टिं नमस्यामः यया विना स्वनिकटस्थितम् (अपि) राष्ट्रं न पश्यन्ति।
८. समानसंस्कृतिमतां (जनानां) यावती पितृपुण्यभूः, तावतीं भुवम् आवृत्य एकं राष्ट्रं निगद्यते।
९. पितृभूत्वं पुण्यभूत्वं (इति) द्वयं यस्य न विद्यते, तस्य तत्र राष्ट्रे स्वत्वं भवितुं न अर्हति किल।
१०. राष्ट्रियान् अवलम्ब्य हि राष्ट्रस्य उत्थान-पतने भवतः, तस्मात् राष्ट्रियाः तु सर्वदा शिक्षणीयाः।
११. शस्त्रं च शास्त्रं च इति द्वे विद्ये प्रतिपत्तये (स्तः)। शस्त्रेण राष्ट्रे रक्षिते (सति) शास्त्रचर्चा प्रवर्तते।

## शब्दार्थाः

**उत्तरम्**- उत्तरस्यां दिशि। **दक्षिणम्**- दक्षिणस्यां दिशि। **भारती**- भारतीयः। **इन्दुसरोवरम्**- हिन्द महासागर इति। **देवनिर्मितम्**- देवैः निर्मितम्=रचितम्। **प्रचक्षते**- कथ्यते। **गीतकानि**- गीतानि। **स्वर्गापवर्गास्पदमार्गभूते**- स्वर्गस्य अपवर्गस्य= मोक्षस्य च यत् आस्पदं= स्थानं तस्य मार्गभूते=मार्गस्वरूपे। **भारतभूमिभागे**- भारतस्य भू-भागे। **सम्प्राप्य**- लब्ध्वा। **सत्कर्मसु**- सत्कर्मणां विषये। **पराङ्मुखः**- विमुखः, प्रतिकूलः, उपेक्षायुक्तः। **पीयूष-कलशम्**- अमृत-कुम्भम्। **हित्वा**- त्यक्त्वा। **विषभाण्डम्**- विषपात्रम्, विषकुम्भम्। **उपाश्रितः**- आश्रयं प्राप्तः, स्वीकृतवान्। **एतद्देशप्रसूतस्य**- अस्मिन् देशे जातस्य। **अग्रजन्मनः**- श्रेष्ठजनानाम्। **सकाशात्**- सामीप्यात्, पार्श्वात्। **स्वं स्वं चरित्रम्**- स्वस्य निमित्तं योग्यं चरित्रं (गुणव्यवहारादीन्)। **शिक्षेरन्**- शिक्षां प्राप्नुयुः। **न मे रोचते**- मह्यं रामाय नहि रोचते। **गरीयसी**- गुरुतरा, तदपेक्षया महत्त्वपूर्णा। **नमस्यामः**- नमस्कुर्मः। **यावती**- यावत्पर्यन्ता, जितनी। **तावतीम्**- तावत्पर्यन्ताम्, उतनी। **भुवम्**- धरित्रीम्। **आवृत्य**- आवरणं कृत्वा। **निगद्यते**- कथ्यते। **पितृभूत्वम्**- पितृभूमेः भावः, इयं मे पितृभूमिरस्तीति भावः। **मातृभूत्वम्**- मातृभूमेः भावः। **स्वत्वम्**- स्वामित्वम्, स्वामित्वाधिकारः, स्वता। **उत्थानपतने**- उत्थानं च पतनं च। **राष्ट्रियान्**- राष्ट्रनिवासिनः, राष्ट्रस्य अङ्गभूतान् घटकान्। **अवलम्ब्य**- आश्रित्य। **शिक्षणीयाः**- शिक्षयितुं योग्याः। **प्रतिपत्तये**- प्राप्तये, ज्ञानाय। **रक्षिते राष्ट्रे**- राष्ट्रे सुरक्षिते सति।

## सन्धिविच्छेदः

**हिमाद्रेश्चैव**- हिम+अद्रेः+च+एव। **धन्यास्तु**- धन्याः+तु। **जन्मभूमिश्च**- जन्मभूमिः+च। **किलार्हति**- किल+अर्हति। **राष्ट्रस्योत्थानपतने**- राष्ट्रस्य+उत्थानपतने। **भवतस्सर्वदा**- भवतः+सर्वदा। **तस्माच्छिक्षणीयास्तु**- तस्मात्+शिक्षणीयाः+तु।

## अभ्यास-प्रश्नाः

**वस्तुनिष्ठ-प्रश्नाः**

१. भारतवर्षस्य उत्तरस्यां दिशि वर्तते —

(अ) हिमाद्रिः/हिमालयः (आ) विन्ध्याचलः
(इ) समुद्रः/इन्दुसरोवरः (ई) गंगासागरः ( )

२. गायन्ति देवाः किल गीतकानि - इत्ययं श्लोकः कस्माद् ग्रन्थाद् उद्धृतः —

(अ) विष्णुपुराणात् (आ) ऋग्वेदात्
(इ) रामायणात् (ई) वृहन्नारदीयपुराणात् ( )

३. ''अपि स्वर्णमयी लंका'' इत्यादौ कः कं प्रति ब्रूते —

(अ) लक्ष्मणः रामं प्रति (आ) रामः लक्ष्मणं प्रति
(इ) रामः हनुमन्तं प्रति (ई) राम-लक्ष्मणौ सीतां प्रति ( )

४. समानसंस्कृतिमतां जनानां पितृपुण्यभूः किं निगद्यते —

(अ) एकं राष्ट्रम् (आ) एकं राज्यम्
(इ) एको भूखण्डः (ई) पितृभूः पुण्यभूः च ( )

५. राष्ट्रस्य उत्थान-पतनयोः अवलम्बः कः वर्तते —

(अ) राष्ट्रस्य शत्रवः (आ) राष्ट्रियाः
(इ) अराष्ट्रियाः (ई) राष्ट्रस्य मित्राणि ( )

**लघूत्तरात्मक-प्रश्नाः**

१. अधोलिखित-प्रश्नानाम् उत्तराणि दीयन्ताम् —

(क) भारते जन्म लब्ध्वा अपि यो जनः सत्कर्म-पराङ्मुखः भवति, स किं त्यक्त्वा किं प्राप्तुमिच्छति ?
(ख) विद्यायाः प्रकारद्वयं किमस्ति ?
(ग) पृथिव्यां सर्वमानवाः स्वं स्वं चरित्रं कस्य सकाशात् शिक्षेरन् ?
(घ) स्वर्गादपि का गरीयसी ?
(ङ) कया विना स्वनिकटस्थमपि राष्ट्रं जनाः न पश्यन्ति ?
(च) राष्ट्रे कस्य स्वत्वं न भवितुं शक्नोति ?
(छ) शास्त्रचर्चा कदा प्रवर्तते ?

२. 'क'-खण्डं 'ख'-खण्डेन सह योजयन्तु —

| क | ख |
|---|---|
| १. भारतम् | राष्ट्रियः |
| २. राष्ट्रम् | हिमाद्रिः |

| | |
|---|---|
| ३. विद्या | भारती |
| ४. हिमालयः | शस्त्रं शास्त्रं च |
| ५. यावती | तस्य |
| ६. यस्य | तावती |

३. अधस्तनपदानां विलोमपदानि पाठात् चित्वा लिखन्तु —

| | |
|---|---|
| १. उत्तरम् | .................. |
| २. लघीयसी | .................. |
| ३. अप्राप्य | .................. |
| ४. उत्थानम् | ................. |
| ५. मरणम् | ................. |
| ६. अनवलम्ब्य | .................. |
| ७. अनावृत्य | .................. |

४. अधस्तन-वाक्येषु स्थूलपदमाधृत्य प्रश्ननिर्माणं कुर्वन्तु —

१. **हिमालयाद्** समारभ्य इन्दुसरोवरं यावत्।

२. धन्यास्तु **ते** सन्ति।

३. **मे** न रोचते।

४. **शस्त्रेण** रक्षिते राष्ट्रे **शास्त्रचर्चा** प्रवर्तते।

५. **जन्मभूमिः** स्वर्गादपि गरीयसी।

**निबन्धात्मक-प्रश्नाः**

१. भारतवर्षस्य भौगोलिक-स्थितिं पठित-श्लोकाधारेण वर्णयन्तु।

२. पठितश्लोकमाधृत्य राष्ट्रस्य परिभाषां लिखन्तु।

३. ''एतद्देशप्रसूतस्य..... सर्वमानवाः'' इति पद्यं हिन्दीभाषया अनूद्यताम्।

४. भारतवर्षस्य प्रशंसायाम् एकं पद्यं लिख्यताम्।

## उत्तरमाला

**वस्तुनिष्ठप्रश्नाः**

१. (अ) २. (अ) ३. (आ) ४. (अ) ५. (आ)

**व्याकरणात्मक-प्रश्नाः**

१. अधोलिखितपदेषु सन्धिविच्छेदं कृत्वा सन्धेः नामोल्लेखः करणीयः —

| पदम् | विच्छेदः | सन्धि |
|---|---|---|
| १. चैव | ............ | ............ |
| २. धन्यास्तु | ............ | ............ |

| | | |
|---|---|---|
| ३. भवतस्सर्वदा | ………… | ………… |
| ४. जन्मभूमिश्च | ………… | ………… |
| ५. भारतं नाम | ………… | ………… |

२. निम्नलिखितेषु पदेषु प्रत्यय-निर्देशः करणीयः —

| **पदम्** | **प्रत्ययः** |
|---|---|
| १. पितृभूत्वम् | पितृभू+………… |
| २. पुण्यभूत्वम् | पुण्यभू+………… |
| ३. स्वत्वम् | स्व+………… |
| ४. शिक्षणीयाः | शिक्ष्+………… |
| ५. आवृत्य | आ+वृत्+………… |
| ६. भवितुम् | भू+………… |
| ७. अवलम्ब्य | अव+लम्ब्+………… |
| ८. हित्वा | हा+………… |
| ९. गरीयसी | गुरु+ईयसुन्=गरीयस्+………… |
| १०. संस्कृतिमताम् | संस्कृति+………… |

३. अधोलिखितानां समस्त-पदानां समास-विग्रहः करणीयः —

| **समस्तपदम्** | **विग्रहः** |
|---|---|
| १. हिमाद्रिः | ……………… |
| २. देवनिर्मितम् | ……………… |
| ३. विषभाण्डम् | ……………… |
| ४. उत्थान-पतने | ……………… |
| ५ शास्त्रचर्चा | ……………… |

४. अधोलिखितेषु पदेषु मूलशब्द-विभक्ति-वचनानां निर्देशः करणीयः —

| **पदम्** | **शब्दः** | **विभक्तिः** | **वचनम्** |
|---|---|---|---|
| १. समुद्रस्य | ………. | ………… | ………… |
| २. हिमाद्रेः | ………. | ………… | ………… |
| ३. हिमालयात् | ………. | ………… | ………… |
| ४. देशम् | ………. | ………… | ………… |
| ५. पुरुषाः | ………. | ………… | ………… |
| ६. प्रसूतस्य | ………. | ………… | ………… |
| ७. सकाशात् | ………. | ………… | ………… |
| ८. दृष्टिम् | ……….. | ………… | ………… |

| | | | |
|---|---|---|---|
| ९. यया | .......... | ............ | ............ |
| १०. यस्य | .......... | ............ | ............ |
| ११. तस्य | .......... | ............ | ............ |
| १२. राष्ट्रे | .......... | ............ | ............ |
| १३. राष्ट्रियान् | .......... | ............ | ............ |
| १४. विद्ये | .......... | ............ | ............ |
| १५. शस्त्रेण | .......... | ............ | ............ |

५. निम्नलिखितेषु पदेषु धातु-लकार-पुरुष-वचनानां निर्देशं कुर्वन्तु —

| **पदम्** | **धातुः** | **लकारः** | **पुरुषः** | **वचनम्** |
|---|---|---|---|---|
| १. गायन्ति | .......... | .......... | .......... | .......... |
| २. भवन्ति | .......... | .......... | .......... | .......... |
| ३. रोचते | .......... | .......... | .......... | .......... |
| ४. पश्यन्ति | .......... | .......... | .......... | .......... |
| ५. विद्यते | .......... | .......... | .......... | .......... |
| ६. अर्हति | .......... | .......... | .......... | .......... |
| ७. भवतः | .......... | .......... | .......... | .......... |
| ८. प्रवर्तते | .......... | .......... | .......... | .......... |

६. अधोलिखित-पदेषु यथानिर्देशं रूपपरिवर्तनं कृत्वा लिखन्तु —

१. समुद्रस्य (सप्तमीविभक्तिः, बहुवचनम्) ...............

२. गायन्ति (लोट्, प्रथमपुरुषः, बहुवचनम्) ...............

३. राष्ट्रम् (षष्ठी विभक्तिः, बहुवचनम्) ...............

४. भारते (षष्ठी विभक्तिः, एकवचनम्) ...............

५. रोचते (लट्, प्रथमपुरुषः, बहुवचनम्) ...............

६. भवन्ति (लृट्, उत्तमपुरुषः, एकवचनम्) ...............

७. निम्नोक्तेषु एकैकं पदमाश्रित्य वाक्यनिर्माणं कुर्वन्तु —

१. यत्र ........................................

२. गायन्ति ........................................

३. चरित्रम् ........................................

४. विना ........................................

५. रोचते ........................................

६. सम्प्राप्य ........................................

७. यावती ........................................

८. उदाहरण-वाक्यमनुसृत्य वाच्यपरिवर्तनं कुर्वन्तु —

| **कर्मवाच्यम्** | **कर्तृवाच्यम्** |
| --- | --- |
| सज्जनेन धेनुः रक्ष्यते। | सज्जनः धेनुं रक्षति। |
| १. देवैः भारतस्य गीतानि गीयन्ते। | ........................ |
| २. अस्माभिः देशः प्रणम्यते। | ........................ |
| ३. पुण्यात्मना भारते जन्म लभ्यते। | ........................ |
| ४. राष्ट्रभक्तेन राष्ट्रं पूज्यते स्वकर्मणा। | ........................ |
| ५. मया माता वन्द्यते। | ........................ |

**प्रयोगात्मक-कार्यम्**

'गायन्ति देवाः' इति पद्यस्य सस्वर-वाचनं कुतश्चिद् अभ्यस्य कुर्वन्तु।